Suta Samhita reference for Mulamaya:
See below:

ज्ञात्वा देवं सर्वपाशापहानिः
　क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिः ।
तस्य ध्यानान्मूलमायाविभेदे
　विश्वैश्वर्यं याति कैवल्यरूपम् ॥ ६२ ॥
एतज्ज्ञेयं नित्यमेवाऽऽत्मसंस्थं
　नातः परं वेदितव्यं हि किंचित् ।
भोक्ता भोग्यं प्रेरितारं च मत्वा
　सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत् ॥ ६३ ॥

---

तस्मिन्नध्यस्तत्वेन तदव्यतिरेकादित्यर्थः । आत्मज्ञानात्सद्यो मुक्तेरदर्श-नात्तस्य तत्साधनत्वं प्रत्यक्षविरुद्धमिति भ्रमव्युदसनाय तस्याभिध्याना-दिति श्रुतिमुदाहरति—तस्येति । तस्य निरस्तसमस्तभेदस्य चिदानन्दै-करसस्य च ब्रह्मणो ध्यानात्सर्वं खल्विदं ब्रह्मेति तादात्म्यज्ञानाच्छ्रवण-जनितात्प्रत्यग्ब्रह्मैक्यविषयात्परोक्षज्ञानाद्वा भेदप्रपञ्चस्य निवृत्तिर्भवति । तदेवाहं ब्रह्मास्मीत्यात्मतया योजनादेकीकरणाद्यौक्तिकान्मननज्ञानाद्वा प्रतीचस्तत्त्वब्रह्मरूपा माया निवर्तते पुनस्तत्त्वभावाद्भूयस्तत्त्वभावनान्निदिध्या-सनपर्यायात्तद्विषयमपरोक्षज्ञानं जायते । तेन च मायातद्विलासं निवा-र्यते । तस्यां निवारितायामपि तज्जनिता वासना प्रारब्धकर्मफलक्षयपर्य-न्तमनुवर्ततेऽतो विदुषोऽपि तत्पर्यन्तो देहयात्राद्यर्थो व्यवहारो न विरुद्धः । भूयः पुनश्चान्ते प्रारब्धकर्मफलोपभोगावसाने विदेहकैवल्या-वसरे स्ववासनया सह कृत्स्नमायानिवृत्तिर्भवतीत्यर्थः ॥ ६१ ॥ तत्त्व-ध्यानादेः फलप्रतिपादिकां श्रुतिं संगृह्णाति—ज्ञात्वेति । देवं द्योतमानं स्वयंप्रकाशं परमात्मानमुदीरितरीत्या प्रत्यगात्मत्वेन ज्ञात्वा सर्वपाशाप-हानिः । मूलमायाकर्मादयः पाशास्तेषां सर्वेषामविद्यास्मितादीनां क्लेशानां च परिक्षयं प्राप्नोतीत्यर्थः । तस्याभिध्यानात्तृतीयं देहभेद इति श्रुतिं व्याचष्टे—तस्येति । अद्वितीयब्रह्मात्मसाक्षात्कारेण मूलाज्ञाननिवृत्तौ